# Sumukhi Upanishad

# સુમુખ્યુપાનિષત્

## Document Information

Text title : sumukhyupAniShat

File name : sumukhyupAniShat.itx

Category : upanishhat, devii, devI, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# સુમુખ્યુપાનિષત્

અથૈનામાવાહયામ્યનવદ્યાં શવાધિરૂઢાં રક્તવસ્ત્રાલઙ્કારયુક્તાં
રક્તપીઠોપવિષ્ટાં ગુઞ્જાહારવિભૂષિતહૃદયાં
ષોડશસમાસમાકારાં યુવતીં પીનોન્નતઘનસ્તનીં સ્વહૃદયે
ચિન્તયિત્વોચ્છિષ્ટપદમાભાષ્ય ચણ્ડાલિનીમભિમતાં સુમુખીં તદન્તે
દેવીં ચોક્ત્વા મહાપિશાચિનીં તસ્માદ્ધરામગ્નિમાયાં બિન્દુમૌલિનીં
સમુચ્ચાર્ય ઠાન્તત્રયં સવિસર્ગં સમુદ્ધૃત્ય દેવીં હૃદયે
વિભાવ્ય ઇઙ્કારસ્વરૂપં સબિન્દુમુખં યુગ્મસ્તનપદાન્તં ભાવયિત્વા
યન્ત્રં યોનિં તદુપરિ શિવવક્ત્રયોનિમષ્ટપત્રં ષોડશાબ્જકં
વૃત્તમેકં ચતુરશ્રં યન્ત્રરાજં વિચિન્ત્યાદૌ દેવીમાવાહ્ય
બિન્દૌ ગન્ધાક્ષતપુષ્પધૂપદીપાન્ સંસ્કૃતાન્નં નાનાવિધં
નિવેદ્યાદ્યં પલં મીનાદ્યન્નં મૂલેન મૂલાં સન્તર્પ્ય સંસ્કૃતાં
પુરસ્કૃતાં યોનિં દેવતાયૈ નિવેદયેત્ । સુકૃતી ચતુરશ્રાન્
દેવાનિન્દ્રાગ્નિયમનિરૃતિવરુણવાયુકુબેરેશાનાન્ વામાવર્તેન સમ્પૂજ્ય
ષોડશાબ્જકે કલાવતી કપાલિની કલ્યાણી નિત્યા કમલા ક્રિયા કૃપા
આકુલા કુલીના કુમારી કુણ્ડલા આકરા કિશોરી કોમલા કલ્પા કુમુદા
એતાઃ પૂજયેત્ । અષ્ટાબ્જે બ્રાહ્મી માહેશ્વરી કૌમારી વૈષ્ણવી વારાહી
ઇન્દ્રાણી ચામુણ્ડા મહાલક્ષ્મીઃ । તતો યોનિપઞ્ચકે ચન્દ્રા ચન્દ્રાનના
ચારુમુખી ચામીકરપ્રભા ચતુરા । તતો યોનૌ વામા જ્યેષ્ઠા રૌદ્રી ।
તદન્તે રતિપ્રીતિમનોભવાઃ પૂજ્યાઃ । પ્રાન્તે પૂજાં સન્તર્પ્ય
પુનર્નૈવેદ્યં બહુગુણં નિવેદ્યારાત્રિકં નિવેદ્ય પરાં પૂજયન્
મહાછત્રચામરાદિસર્વદેવૈર્નમસ્કૃતામાદ્યશક્તિમષ્ટજાતીયાં
સ્વયં ભૈરવો ભૂત્વા કુલાકુલામૃતૈર્દેવીં સન્તર્પ્ય સ્વહૃદયે
તાં પરાં વિસૃજ્ય સુખેનૈવ શિવશક્ત્યાત્મકો ભાવયન્ વિહરેત્ ।
સ સિદ્ધીશ્વરો ભવેત્ । સ સર્વેશ્વરો ભવેત્ । સ લોકાધ્યક્ષો
ભવેત્ । ભવો ભૂત્વા વિભાવયતિ ॥

(શાક્ત-ઉપનિષદઃ)

ઇત્યાથર્વણે સૌભાગ્યકણ્ડે સુમુખ્યુપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

---

*Sumukhi Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*